*Journal of Advances and Scholarly Researches in Allied Education*
*Vol. 16, Issue No. 2, February-2019, ISSN 2230-7540*

# श्रीमद्भगवद्गीतायां तथा कुरान इति ग्रन्थयोः आसुरीमार्गस्य परिणामाः

**Rajender Kumar Saini***

Research Scholar, Rashtriya Sanskrit Sansthan, Deemed University, Janak Puri, New Delhi

***सारांशः-***

***आसुरीमार्गस्य परिणामाः- यदा आसुरीवृत्तयः स्व पराकाषं धरयन्ति तर्हि मानव समाजे अनेकाः विकृतयः द्रष्टुं शक्यन्ते। यथा - अत्याचारः, अनाचारः, भ्रष्टाचारः, हत्या, चैरकर्म, बलात्कारः इत्यादयः। यद्यपि जगतनियन्ता स्वयमेव संसारस्य संचालनाय दैवीवृत्तिम् आसुरीवृत्तिं वा अजनयत् येन श्रद्धावन्तान् श्रद्धाहीनान जनान् विभक्तुं शक्यात्। यथा भगवद्गीतायाम् कथितमस्ति यत् -***

*''शुक्लकृष्णे गती ह्येते जगतः शाश्वते मते।*

*एकया यात्यनावृत्तिमन्ययवर्तते पुनः।।[1]*

---------------------------------x---------------------------------

अर्थात् शुक्लश्च कृष्णश्च अर्थात् हित अहित, दैवी आसुरी वृत्तिश्च संसारस्य निर्माण समये एव रचिते। ये जनाः सत्पथे चलन्ति ते निश्चितरूपेण शाश्वतं शान्तिं प्राप्य क्षणभंगुर संसारे आवागमनात् सर्वदायाः कृते मुक्ताः भवन्ति। अपराश्च ये आसुरी वृत्तियुक्ताः जना सन्ति ते कुकर्मसु लिप्सा भवन्ति तान् स्व स्वामी प्रभुः वा स्वधम्नः निष्कासयति। ते कदापि आवागमनस्य बन्धनात् मुक्ताः नैव भवन्ति। अन्ते ते नरकं प्रति एव गच्छन्ति। विषयेऽस्मिन् 'कुरान' मध्ये कथितमस्ति यत् -

**''इन्ना हदैना हुस्सबील इम्मा शाकिरब्बं इम्मा कपफूरा।''[2]**

अर्थात् अल्लाहः कथयति यत् मया तु तान् सर्वान् सदसद् इत्यस्य पथं दर्शितम् अतः सः दैवी एवं भवेत्। सः आसुरी वृत्तिः गृहीत्वा असुरः न भवेत्। यदि सः आसुरी वृत्तिं स्वीकरोति तर्हि तस्य विनाशः भविष्यति एव।

यथा -

**''अनेकचित्त विभ्रान्ता मोहजालसमावृत्ताः।**

**प्रसक्ताः कामभोगेषु पतन्ति नरकेऽशुचै।''[1]**

अर्थात् अनेकविधि विचलित चित्तयुक्ताः जनाः मोह जालेन आवृत्ताः विषयभोगेषु अत्यन्तासक्ताः अपवित्राः भूत्वा नरके एव गच्छन्ति। एतादृशाः आसुरीवृत्तियुक्ताः जनाः स्वकीयमेव श्रेष्ठरूपेण मन्यन्ते। गर्वयुक्तः धनमानस्य मदेन ग्रस्त शास्त्रोक्त विधनस्य पृथक् नाममात्रा यज्ञैरेव मृषाः यज्ञं कारयन्ति। ते तस्य सुपफलं कदापि प्राप्तुं समर्थो नैव भवितुं शक्नुवन्ति। यथा -

**''आत्म संभाविताः स्तब्ध ध्नमानमदान्विताः।**

**यजन्ते नाम यज्ञैस्ते दम्भेनाविध्पूिर्वकम्।।[2]**

एतादृशाः जनाः तु अहंकार, बल, दर्प, काम, क्रोधः इत्यादीनाम् वशे सत्सु अपि परनिन्दां कुर्वन्ति। तादृशाः जनाः परमात्मनः (मत्तः) द्वेष कर्तारः भवन्ति। यथा -

**''अहंकारं बलं दर्प कामं क्रोधं च संश्रिताः।**

**मामात्मपरदेहेषु प्रद्विषन्तोऽभ्यसूयकाः।।''[3]**

श्रीभगवान् स्वयमेव कथयन्ति यत् तान् द्वेष कर्तान् पापीजनान् क्रूर कर्म कर्तान् नराधमान् अहं पुनः पुनः

आसुरीयोनिषु एव पातयामि। अर्थात् तान् पुनः पुनः दुःखं ददामि।

यथा -

**"तानहं द्विषतः क्रूरान्संसारेषु नराध्मान्।**

**क्षिपाम्यजस्रमशुभानासुरीश्वेव योनिषु।।[4]**

इत्थं ते मूढ़ पुरूषाः जन्म-जन्मांतर पर्यन्त आसुरी योनिं प्राप्य तस्याः अपि निकृष्टतरेषु यौनिषु गच्छन्ति। तेषां दुःखानाम् अन्तः नैव भवति।

यथा -

**"आसुरीं योनिमापन्ना मूढ़ा जन्मनि जन्मनि।**

**मामप्राप्यैव कौन्तेय ततो यान्त्यध्मां गतिम्।।"**

असुर सम्बन्धिताः यौनयः अज्ञानाच्छादिताः सन्ति। एतेषु यौनिषु ते एवः जनाः गच्छन्ति ये आत्मनः हन्ताः सन्ति। पशूनाम् योनयः एव अन्ध्कारमयाः अज्ञानयुक्ताः वा सन्ति। यतोहि पशूनाम् मनः ज्ञानस्य संचयम् नैव कर्तुं शक्नोति। एतस्मात् कारणात् ते तमे एव वसन्ति।

यथा -

**"असुर्या नाम ते लोका अन्धेन तमसावृत्ताः।**

**तास्ते प्रेत्याभिगच्छन्ति ये के आत्महनो जनाः।।[2]**

इत्थं वयं यदा भगवद्गीतायाः कुरानशरीपफस्य अध्ययनं कुर्मः तर्हि प्राप्नुमः यत् उभयोः ग्रन्थयोः एव अन्यायस्य अत्याचारस्य विरूद्धं एक सदृशाः व्यवस्था दृश्यते। नु केवलं गीता कुरानयोः एव अपितु मानवसृष्टि कालादेव दैवी-आसुरी वृत्तियुक्तेषु जनेषु संघर्षस्य वर्णनं प्राप्यते। राम-रावण मध्ये श्रीकृष्ण-कंस मध्ये अपि दैवी-आसुरी संघर्षः अभवत्। एतादृशानि अनेकानि उदाहरणानि वयं द्रष्टुं शक्नुमः। पृथिव्यामुपरि देवासुर वृत्तयः तु सर्वदातः निवसन्ति। आधुनिक कालेऽपि संघर्षस्य युद्धस्य वा प्रमुख कारणं दैवासुर वृत्तिः एव अस्ति। आसुरीवृत्तेः अन्तः दुःखदायकः भवति। अतः अस्माभिः आसुरी वृत्तिं कदापि नैव धरणीया। यतोहि आसुरी वृत्तयः तु विनाशस्य सूचकाः सन्ति। आभिः कोऽपि जनः विकासः नैव कर्तुम् शक्यते। एताषां त्यागः एव श्रेष्ठः भवति।

यदा महाभारतस्य युद्धे स्व ज्ञातिनः अर्जुनस्य समक्षाः युद्धाय सन्नद्धा भवन्ति। ते सर्वे अर्जुनस्य बान्ध्वाः एव सन्ति। किन्तु ते सर्वे अर्जुनेव सह युद्ध करणार्थमेव तत्रा स्थिताः सन्ति। ते अर्जुनस्य हननाय युद्धे आगच्छन्ति। तान् दृष्ट्वा अर्जुनः युद्धाय तत्परो नैव भवति। सः युद्धं न करणस्य संकल्पं धरयति। तदा श्रीकृष्णः अर्जुनं उपदिशति प्रेरयति च सः अर्जुनं कथयति यत् एते सर्वे आततायिनः सन्ति। त्वं उत्थाय एतेषां वधं कुरू। यथा -

**"क्लैब्यं मा स्म गमः पार्थ नैतत्परयुपपद्यते।**

**क्षुद्रं हृदय दौर्बल्यं त्यक्त्वोतिष् परन्तपः।।[1]**

अर्थात् हे अर्जुन् त्वं अस्मिनृ रणे नंपुसकतां मा प्राप्नुयाः। वीरस्य कृते एतत् नैव शौभते। अतः त्वं हृदयस्य दुर्बलतां त्यक्त्वा युद्धाय उतिः तथा एतैः आततायिभिः सह युद्धं कुरू। एतादृशी एव स्थिति हजरत मुहम्मदस्य समक्षमपि आगता पंचत्रिंशत् शत वर्षेभ्यः पश्चात् तदा अल्लाहः अपि अरबी भाषायां एतस्याः वार्तायाः पुनरावृत्तिः कृता। यथा -

**"कुतिब अलैकुमुल् कितालु घ हुव कुर्हुल्लकुम्।"[2]**

अर्थात् एषः धर्मयुद्धः (जिहाद) भवताम् कृते अनिवार्य कृतः। अतः एतस्मात् युद्धात् भयं मा धरयतु। अनेनयुद्धेन त्वं स्वर्ग एव प्राप्स्यसि। यथा श्रीमद्भगवद्गीतायाम् कथितमस्ति यत् -

**"यदृच्छया चोपपन्नं स्वर्ग द्वारमपावृत्तम्।**

**सुखिनः क्षत्रियाः पार्थ लभन्ते युद्धमीदृशम्।।[3]**

त्वं यदि इच्छसि यत् स्वर्गस्य द्वारं तव कृते अनावृत्तं भूयात् तस्यकृते भवान् उतिष्ठतु तथा एतेषां अत्याचारिणां सह युद्धं करोतु। कुरान मध्येऽपि पुनः कथिता एषा वार्ता यथा -

**"इन्नल्लजीन आमन् बल्लज़ीन हाजरू व जाहद् पफी**

**सबीलिल्लाहि ऊलाइक यरजून रहम तल्लाहि वल्लाहु गपफु र्रहीम"[1]**

अर्थात् ये श्राद्धावन्तः जनाः अत्रा आगच्छन् तथा ते ईश्वरीयसत्तायाः विरूद्ध कार्यं कर्तृभिः जनैः सह युद्धं अकुर्वन्। तान् जनान् अल्लाहः क्षमयिष्यति। भगवद्गीतायाम् अपि कथितमस्ति यत्-

**"हतो वा प्राप्स्यसि स्वर्गं जित्वा वा मोक्ष्यसे महीम्।**

www.ignited.in

**तस्मादुति कौन्तेय युद्धाय कृतनिश्चयः।।[2]**

हे अर्जुन! यदि भवान् अस्मिन् युद्धे मृत्युं प्राप्नोति तर्हि स्वर्गं प्राप्स्यसे यदि तव विजयः भवति तर्हि सम्पूर्णपृथिव्याम् शासनं करिष्यसि। पृथिव्याः सर्वेषां वस्तूनामुपरि तव अधिकारः भवेत्। त्वं तेषाम् उपभोगं कुरू। कुरानशरीपफ इत्यस्मिन् अपि एषा एव वार्ता कथिता -

**‘‘मुयुकातिल पफ़ी सबीलिल्लाहि प़फ युक्तल अव**

**यग़लिब पफ सौपफ नूअतिहि अजरन अजीमा।।’’[3]**

अर्थात् यः अल्लाहस्य पथे जिहाद अर्थात् धर्मयुद्धं करिष्यति तर्हि सः वीरगतिं प्राप्स्यति अथवा महान् लाभं प्राप्स्यसि। भगवद्गीतायामपि श्रीकृष्णः अर्जुनं कथयति यत् साधूनाम् सन्तानाम् बालकानां स्त्रीणा×च मानवीय मूल्यानां सुरक्षायै त्वं उतिष्ठ युद्धं च कुरू। एतान् असुरान् परलोकं प्रेष्य एव महत् यशसं प्राप्नोतु। मया तु एते पूर्वमेव मारिताः। अधुना त्वंतु निमित्त मात्रोऽसि।

**सन्दर्भवग्रन्र**

1. गीता.२/४८

2. गीता.२/५०

3. गीता.६/२

4. गीता.६/२०

5. गीता८/२३

6. गीता.१४/२६7.गीता.१०/१०

8. गीता.१२/६

9. गीता.१६/२४

10. छान्दयो.उप.५/१०/७

11. गीता.५/१२

**Corresponding Author**

**Rajender Kumar Saini***

Research Scholar, Rashtriya Sanskrit Sansthan, Deemed University, Janak Puri, New Delhi

rajenderkv@gmail.com